## ६३. सः वा ?

कः /खलु /क्तवतु

पत्नी - भवान् कदा आगतवान् ?

पतिः - किमर्थं भोः तथा पृच्छति । इदानीमेव आगतवान् ।

पत्नी - रविशङ्करः आगतवान् आसीत् ।

पतिः - कः सः रविशङ्करः ?

पत्नी - सः भवन्तं जानाति इति ।

पतिः - कः सः, न स्मरामि खलु ?

पत्नी - विशालनेत्रः, द्रष्टुं सुन्दरः, उन्नतोऽपि, श्वेतवर्णीयः । भवतः विषये बहु-बहु श्लाघितवान् । तेन सह तौ द्वौ विदूषकौ इव स्तः खलु ? तौ अपि आगतवन्तौ । ते सर्वेऽपि भवन्तं बहु प्रशंसितवन्तः ।

पतिः - तर्हि कः भोः तादृशः । तस्य नाम 'रविशङ्कर ' इति सः एव उक्तवान् वा ? अथवा.... भवती चिन्तितवती वा ? अन्यत् किम् उक्तवान् ।

पत्नी - तावदपि न जानामि वा ? अहं यत् वदामि तस्य सदा उपहासं करोति भवान् । सः कविसम्मेलने मिलितवान् इति । तत्र भवतः सन्दर्शनमपि दूरदर्शने आयोजयामि इति उक्तवान् इति । अतः दिनाङ्कं निश्चेतुम् आगतवान् आसीत् ।

पतिः - सः वा ?

पत्नी - किमर्थं हसति भोः । इदानीं वा ज्ञातवान् खलु ।

पतिः - सः रविशङ्करः न भोः उमाशङ्करः । बहुकथकः, कार्यमेकमपि न साधयति ।

पत्नी - रविशङ्करो वा, उमाशङ्करो वा कोऽपि शङ्करः एव खलु ।

पतिः - अस्तु । अहं तेन सह वार्तां करिष्यामि ।